अथ वार्ताः

## एम.पी बोर्ड परिणामानि

सम्पूर्णे मध्यप्रदेशे प्रायः त्रयोविंशतिः लक्षं छात्राः अद्य प्रातः सार्धैकादशवादने पञ्चाष्टम-वर्गयोः बोर्ड् इत्यस्य परीक्षाफलानि प्राप्स्यन्ति। परिणामानि राज्य-शिक्षा-केन्द्र-पोर्टल् इत्यत्र प्रकाश्यन्ते, यत्र छात्राः स्वस्य परिचयाङ्कपूरणेन परीक्षानुक्रमाङ्कम् उपयुज्य वा प्राप्तुं प्रभवन्ति। प्रक्रियां सुलभतरं कर्तुं अधिकारिणः ऑन्लाइन इति -माध्यमेन उपलभ्यमानानां क्यू. आर्. कोड्स् इत्यनेनापि परिणामदर्शनं कर्तुं शक्ष्यन्ति इति उक्तवंतः।

## आरएस-पीएम पश्चिम एशियाः

प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिम-एशिया-क्षेत्रे शान्तिं स्थापयितुं संवादस्य कूटनीतेः च आह्वानम् कृतमस्ति। पश्चिम-एशियाक्षेत्रे वार्तमानिकां संघर्षपूर्णां स्थितिमालक्ष्य ह्यः राज्यसभायां भाषमाणः श्रीमोदी अवदत् यत्, भारतं डी-एस्केलेशन् इत्यस्य, होर्मुज़्-जलसंध्याः पुनः उद्घाटनञ्चेति विषयौ गाम्भीर्येण समुत्थापयदिति। श्रीमोदीः अवदत् यत्, अस्यां युद्धपरिस्थितौ अपि भारतीयानां नौकायानानां सुरक्षित-सञ्चारार्थं कूटनीतिद्वारा भारतं निरन्तरं प्रयतमानः अस्ति। सः आश्वासितवान् यत् सर्वकारः पेट्रोल्, डीज़ल् इत्यादि सहितं, वात्यन्धन- उर्वरकाणाञ्च सुगमपूर्तिं सुनिश्चितं करोति इति। प्रधानमन्त्री अवदत् यत्, भारतस्य अर्थव्यवस्थायाः मूलभूतान्याधाराणि दृढानि सन्ति, सर्वकारश्च द्रुतगत्या परिवर्त्यमानां स्थितिं निकटतया निरीक्षमाणः अस्तीति।

## GOVT-PNG आदेशः

सर्वकारेण अस्य वर्षस्य प्राकृतिकग्यास् अथ पेट्रोलियम-उत्पादानां वितरणस्य स्थापन-परिचालनादि सहितम् अन्यसौकर्याणां विस्तारसम्बन्धितादेशः आवश्यक-वस्तु-अधिनियम-पञ्चपञ्चपञ्चाशदुत्तरैकोनविंशतिः इत्यस्यान्तर्गतम् अधिसूचितोऽस्ति।

## छत्तीसगढ-योजनाः

छत्तीसगढस्य मुख्यमन्त्री विष्णुदेव सायः अद्य दीनदयाळ उपाध्याय-भूमिहीन-कृषि-श्रमिक-कल्याण-योजनान्तर्गतं प्रायः पञ्च- लक्ष-भूमिहीन-कृषि-श्रमिक-कुटुम्बानां वित्तकोषेषु प्रायः पञ्चशत- कोटि-रूप्यकाणि प्रत्यक्षरूपेण प्रेषयति। स्थानान्तरणमिदं बलोदाबजार्-नगरात् भविष्यति, यत्र ग्रामीणसमाजस्य आत्यन्तिकतया दुर्बलवर्गान् समर्थयितुं राज्यस्य प्रतिबद्धतायाः प्रमुखं पदम् अस्तीति मन्यते। योजनान्तर्गतं सर्वकारः दशसहस्र- रूप्यकाणां वार्षिक-वित्तीय-साहाय्यं योग्यानां परिवाराणां वित्तकोषेषु प्रत्यक्षतया प्रददाति।

## गुजरात-यू. सी. सी.:

गुजरात्-विधानसभायां ह्यः सप्तघण्टातः अधिककालस्य सुदीर्घकालिक-वादविवादानन्तरं एकरूप-नागरिक-संहितायाः (यू. सी. सी.) विधेयकं बहुसङ्ख्यकैः ध्वनिमतैः स्वीकृतम्। विधेयकं विवाहस्य, विवाह-विच्छेदस्य, उत्तराधिकारस्य, सहवास-सम्बन्धस्य च नियमनार्थं धर्मस्य विचारं विना सामान्यविधिसम्बन्धि-संरचनायाः प्रस्तावं करोति। गुजरात्-राज्यस्य मुख्यमन्त्री भूपेन्द्र पटेलः विधेयकमिमम् उपस्थापितवान्, एकसप्ताहाभ्यन्तरे राज्य-नियुक्त-समितिः यू. सी. सी. इत्यस्य कार्यान्वयनस्य विषये स्वस्य अन्तिमं प्रतिवेदनम् उपस्थापितवती। विधेयकं स्वीकृत्य, उत्तराखण्डानन्तरं यू. सी. सी. इतीदं स्वीकृत्य गुजरातराज्यं देशस्य द्वितीयं राज्यम् अभवत्।

## श्रीलङ्का राष्ट्रपतिः

प्रधानमन्त्री नरेन्द्रमोदी ह्यः श्रीलङ्कादेशस्य राष्ट्रपतिना अनुरा कुमार दिसानायके इत्यनेन सह दूरभाषद्वारा वार्तालापम् अकरोत्। सामाजिक-माध्यमे, प्रधानमन्त्री मोदी इत्ययम् अवदत् यत् तौ पश्चिम-एशियायाः विकसितां स्थितिं विश्व-ऊर्जा-

सुरक्षां प्रभावितं कुर्वतां व्यवधानानां विषये विशेषतया चर्चां कृतवन्ताविति। तौ भारत-श्रीलङ्का ऊर्जा-सहकारस्य निर्माणार्थं क्षेत्रीय-सुरक्षां वर्धयितुञ्च उद्दिष्टानां प्रमुख-उपक्रमाणां प्रगतिं समीक्षितवन्तौ। अपि च, प्रधानमन्त्री मोदी अवदत् यत्, भारत-श्रीलङ्का-देशौ संयुक्तप्रतिसन्धिं समापयितुं संयुक्तरूपेण कार्यं कर्तुं प्रतिबद्धतां पुनः दृढीकृतवन्तौ इति।

**<u>दिल्ली-बजटः</u>**

दिल्लीति केन्द्रशासितप्रदेशस्य मुख्यमन्त्री रेखा गुप्ता अघोषयत् यत् नीति-आयोगानुरूपं देहली-संस्थागत-थिंक-ट्याङ्क् (डी. ऐ. टी. ऐ.) इति नूतनं चिन्तनव्यवस्थां स्थापयितुं सर्वकारस्य योजना अस्ति, उपराज्यमिदञ्च उन्नत-तन्त्रज्ञानस्य विनिर्माणस्य केन्द्ररूपेण स्थापयितुं नूतनानि सेमिकण्डक्टर् अथ ड्रोन-नीतयः प्रवर्त्यन्ते इति। अस्य सत्रस्य आयव्ययक प्रस्तुतीकरणसमये मुख्यमन्त्री घोषितवती यत् शासनस्य उन्नत्यै एकीकृत-सार्वजनिकसेवाः प्रदातुं च शत- कोटिरूप्यकाणां व्ययेन त्रयोदश लघु-सचिवालयानां स्थापना भविष्यतीति।

**<u>खेलो इण्डियाः</u>**

अद्य छत्तीसगढ-राज्ये प्रथमा खेलो-इण्डिया-जनजातीय-क्रीडा आरभ्यते। एप्रिल्-मासस्य तृतीय-दिनाङ्कपर्यन्तं प्रचलन्तासु क्रीडासु अथ्लेटिक्स्, हाकी, फुट्बाल्, धनुर्विद्या, मल्लयुद्धं, भारोत्तोलनम्, तरणम् इत्यादीनि सप्तसु क्रीडाविभागेषु स्पर्धाः भविष्यन्ति। एतदतिरिच्य मल्लखम्बः, कबड्डी च प्रदर्शक-क्रीडारूपेण समाविष्टाः सन्ति। खेलो-इण्डिया-जनजातीय-क्रीडाः छत्तीसगढ-राज्यस्य रायपुर-नगरे, जगदलपुर-नगरे, अम्बिकापुर-नगरे च आयोज्यन्ते।

।। इति वार्ताः।।